# COMMON PRE-BOARD EXAMINATION 2025-26

## Subject: SANSKRIT 119

SET-3

Max marks : 80 Time : 3 Hours

**सामान्य निर्देश:**

- **कृपया सम्यक्तया परीक्षणं कुर्न्तु यत् अस्मिन् प्रश्नपत्रे 9 पृष्ठानि मुद्रितानि सन्ति ।**
- **कृपया सम्यक्तया परीक्षणं कुर्न्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।**
- **अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।**
- **प्रत्येकं खण्डं अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।**
- **उत्तलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कःअवश्यं लेखनीयः ।**
- **प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारं एव लेखनीयः ।**
- **सर्वेषां प्रश्नानां उत्तराणि संस्कृतेन ल्खनीसानि ।**
- **प्रश्नानां उत्तराणि ध्यानेन अवश्यं पठनीयः ।**

प्रश्नपत्रस्वरूपम् -

| | | |
|---|---|---|
| “क” खण्डः | - अपठितावबोधनम | **10** अङ्काः |
| “ख” खण्डः | - रचनात्मककार्यम् | **15** अङ्काः |
| “ग” खण्डः | - अनुप्रयुक्तव्याकरणम् | **25** अङ्काः |
| “घ” खण्डः | - पठितावबोधनम् | **30** अङ्काः |

**खण्डः - क(अपठितावबोधनम्)** **10**

**1. अधोलिखित अपठितगद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत**

अधुना योगस्य अतीव प्रसारः वर्तते | वस्तुतः अद्यत्वे अस्य महती आवश्यकता अस्ति | अनेके महापुरुषाः योगस्य क्षेत्रे कार्यं कुर्वन्ति | एतस्मिन् बाबा रामदेवः प्रमुखः अस्ति | योगः वस्तुतः दर्शनम् अस्ति | अनेन वयं ईश्वरमपि प्राप्तुं शक्नुमः |पल्लवग्राह्यता रूपेण वयं केवलं स्वास्थ्य लाभं प्राप्तुं शक्नुमः | सूर्य नमस्कारः अस्मिन् विधायां मुख्यः व्यायामः अस्ति | अस्मिन् व्यायामे द्वादश आसनाः भवन्ति तत्पश्चात् मुद्रा प्राणायामश्चापि सन्ति | योगेन वयं स्वास्थ्य लाभेन सह रोगाणां निदानम् अपि कर्तुं

शक्नुमः | अनेके असाध्य रोगाणाम् आदि निदानं संभवः | छात्राणां कृते अस्य विद्या अतीव महत्वपूर्णा अस्ति |

I. **<u>एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)</u>** **2X1=2**

(i) अधुना कस्य प्रसारः वर्तते ?

(ii) केषां कृते योगस्य अतीव महत्वपूर्णा अस्ति ?

(iii) रोगाणाम् अपि चिकित्सा केन माध्यमेन सम्भवति ?

II. **<u>पूर्णवाक्येन उत्तरत केवलं प्रश्नद्वयम्)</u>** **2X2=4**

(i) योगस्य मुख्यः व्यायामः कः अस्ति?

(ii) सूर्य नमस्कारस्य कति स्थितयः सन्ति ?

(iii) अनेन वयं किं प्राप्तुं शक्नुमः ?

III. **अस्य गद्यांशस्य उचितं शीर्षकं लिखत** **1**

IV. **<u>निर्देशानुसारं प्रदत्त -विकल्पेभ्यः उचितम् उत्तरं चिनुत(केवलं प्रश्नत्रयम</u>**) **3X1=3**

(i) **वर्तते** - इति क्रिया पदस्य कर्तृपदं किम् ?
(अ) अधुना (आ) अतीव (इ) प्रसारः (ई) योगस्य
(ii) **नूनम्** - इत्यर्थे किंपदं अत्र प्रयुक्तम्?
(अ) प्रमुखः (आ) वस्तुतः (इ) निदानम् (ई) वर्तते
(iii) **महापुरुषाः** - इत्यस्य विशेषणपदं किम्?
(अ) विद्या (आ) लाभं (इ) असंभवः (ई) अनेके
(iv) **नष्टम्** - पदस्य विलोमपदं किमत्र प्रयुक्तम् ?
(अ) लाभम् (आ) वयं (इ) निदानम् (ई) केवलम्

**खण्डः - ख(रचनात्मकं कार्यम्)**

2. **<u>भवतः अनुजः "तनिष्कः" पठनं त्यक्त्वा चलदूरभाषयन्त्रेण क्रीडने सर्वदा वयस्तः भवति | तं पठनार्थं प्रेरयन् लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा पुनः</u> लिखत-** **10x½=5**

परीक्षा भवनात् ,

नवदिल्लीतः |

दिनाङ्कः .......................

प्रियः ................(i)...............

शुभाशीषः |

ह्यः एव मातुः .........(ii).......... प्राप्तम् | माता अद्यत्वे पठने तव ...........(iii)......... दृष्ट्वा चिन्तिता अस्ति | त्वं पठनं त्यक्त्वा चलदूरभाषयन्त्रेण ........(iv)........रतः भवसि|अर्धवार्षिक परीक्षायाम् अपि तव ........(v)....... न्यूनाः आगताः | एतद् तु न .........(vi)...... | यद्यपि क्रीडनम् अपि .......(vii)..... आवश्यकं परं तत् शारीरिकं भवेत् | क्रीडनेन सह पठनम् अपि अत्यावश्यकम् | ये चलदूरभाषयन्त्रेण अत्यधिकं समयं वृथां यापयन्ति ते न केवलं .......(viii)...... अस्वस्थाः भवन्ति अपितु जीवने असफ़लाः अपि भवन्ति | अतः मम ......(Ix)....... अस्ति यत् समयस्य महत्वम् अवगत्य .......(x)....... ध्यानेन पठ | मातृपितृचरणयोः मे प्रणामाः कथनीयाः |


तव अग्रजः

मोहि

**<u>मञ्जूषा</u>**

**(त्वम्, मानसिकरूपेण, पत्रम्, स्वास्थयाय, अरुचिम्, तनिष्क, अङ्काः, क्रीडेन, उचितम्, परामर्शः)**

3. **<u>मञ्जूषायाम् प्रदत्त शब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत</u>** **5X1=5**



**मञ्जूषा-**

**(नद्याः, एका, जले, अस्ति, नदी, वृक्षाः, रजकः, बालौ, क्षालयति, वस्त्राणि, तरतः, ग्रामाद्, प्रवहति, तटे, रमणीयः, कुटीरः, पर्वतः, बहिः, सन्ति, अस्याः )**

**4.** **<u>अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-</u>** **10x½=5**

एकस्मिन् ...........(i)...... एकः सर्पः वसति स्म | .........(ii)...... भयात् कोऽपि जनः उद्यानं गन्तुं न शक्नोति स्म | एकदा एकः महात्मा तत्र आगत्य तं सर्पं ........(iii)........ त्यक्तुम् अवदत् | तस्य महात्मनः प्रभावेन हिंसकप्रवृत्तिं ...........(iv)......सः सर्पः शान्तः अभवत् | एतद् ज्ञात्वा सर्वे विस्मिताः अभवन् | बालकाः प्रस्तरेण प्रहारं कृत्वा सर्पम् ........(v)...... अकुर्वन् | सर्पः शान्त भावेन .............(vi)............. किमपि न अकरोत् | यदा सः महात्मा ........(vii) तत्र आगच्छत् तडा सर्पस्य ईदृशीम् ..........(viii)....... दृष्ट्वा दुःखी अभवत् | सः सर्पात् सर्वं ज्ञात्वा अवदत् 'हिंसा सर्वथा .......(ix)...... परं स्वरक्षार्थं कृते कार्ये न काचित् हानिः | एतत् श्रुत्वा भयमुक्तः सर्पः स्वकोटरम् .........(x)............ |

**मञ्जूषा- ( त्याज्य,उद्याने,हिंसा, सर्पस्य, अगच्छत्, परित्यज्य, आहतं, दशां, पुनः, स्थितः )**

**<u>खण्ड - ग</u>**

**5.** **<u>अधोलिखितेषुसन्धिं सन्धिच्छेदं वा कुरुत</u>** **4x1=4**

**(i)** **<u>अचिरादेव</u>** (ii) <u>एकः + अपि</u> (iii) <u>चित्+आनन्दः</u> (iv) <u>कः+चित्</u>

**6.** **<u>अधोलिखित रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः उचितशब्दरूपं चित्वा लिखत</u>** **4x1=4**

(i) कथमत्र **<u>नतोन्नते</u>** विषमे मार्गे क्रीडथ ?

(अ) नतस्य उन्नते (आ) नतो उन्नते (इ) नतः च उन्तः च (ई) नतः उन्नतिः इति

(ii) **<u>वाक्पटुः</u>** मन्त्री न परिभूयते ।

(अ) वाक्पटुः (आ) वाकस्य पटुः (इ) वाके पटुः (ई) वाचि पटुः

(iii) **<u>न पूर्वः</u>** कोशः विद्यते तव भारति ।

(अ) अपूर्वः (आ) अनपूर्वः (इ) नपूर्वः (ई) पूर्वन

(iv) काकः <u>सक्रोधम्</u> आगच्छति ।

(अ) सः क्रोधः (आ) क्रोधं करोति इति (इ) क्रोधेन सहितम् (ई) सह क्रोधः

**7.** **<u>अधोलिखितरेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा प्रदत्तविकल्पेभ्यः चित्वा वाक्तपूर्तिः क्रियताम्</u>** **4x1=4**

**(i)** सा **<u>देवी</u>** मधुरं गायति ।

(अ) देव + ई (आ) देव + ङीप् (इ) देव + टाप् (ई) देवा + आ

**(ii)** **<u>शिष्य + टाप्</u>** जलेन लताः सिञ्चति ।

(अ) शिष्यः (आ) शिष्यम् (इ) शिष्या (ई) शिष्यता

**(iii)** सा **<u>चपल + तल्</u>** बालिका अस्ति ।

(अ) चपला (आ) चपलताम् (इ) चपलता (ई) चपला

**(iv)** अस्मिन् अवसरे **<u>समाज + ठक्</u>** कार्यम् क्रियते ।

(अ) स मजिकम् (आ) समाजिकौ (इ) सामाजिकम् (ई) सामाजिकाः

**8.** **<u>अधोलिखित संवादे रिक्तस्थानानि वाच्यानुसारं प्रदत्तविकल्पेभ्यः उचित पदं चित्वा पूरयत</u>** **3x1=3**

**<u>आदित्यः</u>** - वैभव ! इदानीं त्वया किं क्रियते?

**<u>वैभवः</u>** - आदित्य ! अधुना तु मया ........(i)........ क्रियते | का वार्ता ?

आदित्यः- नास्ति विशेषः | ............(ii)..............क्रीडितुं बहिः गम्यते, त्वमपि आगच्छ |

**<u>वैभव :-</u>** न | श्वः मम परीक्षा भविष्यति | अतः अद्य ...............(iii)....... संपूर्ण दिने पठामि |

**<u>आदित्यः</u>** - अस्तु, किन्तु त्वं किं पठसि ?

**मञ्जूषा ( अस्माभिः पठ्यते अध्ययनम् )**

**9.** **अधोलिखित-दिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूरयत** **4x1=4**

**(i)** बालः सायं (5:00) ---------------- वादने उद्यानम् गच्छति ।

**(ii)** (7:15) ---------------- वादने गृहं प्रत्यागच्छति ।

**(iii)** (9:30) ---------------- वादने भोजनं खादति ।

**(iv)** (10:00) ---------------- वादने पाठान् पुनरावृत्तिः करोति ।

**10.** **<u>अधोदत्त वाक्येषु मञ्जूषातः उचित अव्ययानि प्रयुज्य वाक्तपूर्तिः क्रियताम्</u>** **3x1=3**

**(i)** सः ...................... गन्तुम् इच्छति ?

**(ii)** अत्र ....................... लिख |

**(iii)** ताः ..................... क्रीडां द्रष्टुम् अगच्छन् |

**(ह्यः, कदा, मा )**

**11.** **<u>रेखाङ्कितपदेषु अशुद्धयः सन्ति तेषां शुद्धरूपं विकल्पेभ्यः चित्वा लिखत</u>** **3x1=3**

**(i)** **<u>सा</u>** पुस्तकम् अपठन् |

(क) तत् (ख) सः (ग) तौ (घ) ताः

**(ii)** आत्मा अविनाशी **<u>सन्ति</u>** |

(क) स्तः (ख) अस्ति (ग) आसीत् (घ) आसी

**(iii)** मालाकारः **<u>पुष्पाणि</u>** मालां रचयति |

(क) पुष्पेण (ख) पुष्पेभ्यः (ग) पुष्पाय (घ) पुष्पैः

**खण्डः-घ**

**12.** **<u>अधोलिखित पठित गद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत</u> ।**

अथ एकदा भग्वान् बोधिसत्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा अभवत् | सः बाल्यात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारङ्गतः च आसीत् | जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजा: पालयति स्म | कारुण्य-औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्य समृद्धाः दानशालाः अकारयत् | तत्र अर्थिना समूहः अन्न-पान-वसन-रजत-सुवर्णादिकानि अभिष्टानि वस्तूनि प्राप्य संतुष्टः अभवत् | राज्ञः दानशीलतां आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयन्ति स्म |

**I.** **<u>एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)</u>** **2x1/2=1**

**(i)** भगवान् बोधिसत्वः केषां राजा अभवत् ?

**(ii)** राजा नगरस्य समन्ततः काः अकारयत् ?

**(iii)** कः पुत्रवत् प्रजाः पालयति स्म ?

**II.** **<u>एकवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)</u>** **2X1=2**

(i) राजा बाल्यात् एव कीदृशः आसीत् ?

(ii) अर्थिनां समूहः किं प्राप्य संतुष्ट: अभवत् ?

(iii) कस्य दानशीलताम् आकर्ण्य जनाः देशान्तरेभ्यः अपि तं देशम् आयन्ति स्म ?

**III.** **<u>यथानिर्देशानुसारं लिखत (केवलं प्रश्नद्वयम्)</u>** **2x1=2**

(i) **"आयन्ति"** - क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(ii) **"अभिष्टानि"** - इति पदस्य किं विशेष्यपदं प्रयुक्तम् ?

(iii) **"श्रुत्वा"** - इत्यस्य किं पर्यायपदं प्रयुक्तम् ?

**13.** **<u>अधोलिखितं पद्यांशं पठित्वा प्रदत्त - प्रशनानाम् उत्तराणि संस्कृतेन लिखत</u>**

"त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदिरयेत् |

परित्यज्य फलं पक्वं भुङ्क्तेपक्वं विमूढधीः ||"

**I.** **<u>एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)</u>** **2x1/2=1**

(i) मूर्खः कीदृशीं वाचं त्यजति?

(ii) मूर्खः कां वाचम् अभ्युदीरयति ?

(iii) कः पक्वं फलं परित्यजति ?

**II.** **<u>एकवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)</u>** **2X1=2**

(i) विमूढधीः कीदृशं फलं भुङ्क्ते ?

(ii) विमूढधीः किं परित्यजति?

(iii) विमूढधी कां वाचं त्यक्त्वा कां वाचम् अभ्युदीरयति ?

**III.** **<u>यथानिर्देशानुसारं लिखत (केवलं प्रश्नद्वयम्)</u>** **2x1=2**

**(i) भुङ्क्ते -** क्रियापदस्य कर्तृपदं किं प्रयुक्तम् **?**
**(ii) परित्यज्य -** इत्यर्थे किं पदं अत्र प्रयुक्तम् **?**
**(iii) मधुरम् -** इत्यस्य विलोमपदं किमत्र प्रयुक्तम् **?**

**14.** **<u>अधोलिखितपठित नाट्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत</u>**

**पर्यटनाधिकारी** - सम्यक् अभिज्ञातम् ! मनोहरे सुरम्ये "तवाङ्ग" इति स्थले राजते अयं बौद्ध मठ: | पञ्चशतानां बौद्धभिक्षुणां निवास योग्या स्थली इयं | लोहितजनपदे अपि अनेक बौद्धविहाराः सन्ति |

**नीलिमा** - मान्यवर ! मया अस्य प्रदेशस्य 'परशुरामकुण्डम्' इति दर्शनीयस्थलविषये अपि पठितम् ! किम् इदम् ?

**पर्यटनाधिकारी** - आम् | एतत् कुण्डं तु लोहितनद्याः किञ्चित् दूरे अस्ति |पूर्वम् इदं 'ब्रहमकुण्डम्' आसीत् | इदं लोहितनद्याः उद्गमस्थलम् इति मन्यते | अत्र अनेकानि अन्यानि दर्शनीयानि स्थलानि अपि सन्ति |

I. **<u>एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)</u>** **2x1/2=1**

(i) बौद्धमठः कुत्र अस्ति? (ii) 'ब्रहमकुण्डम्' कस्य पूर्वनाम आसीत् ?

(iii) एतत् कुण्डं तु कस्याः किञ्चित् दूरे अस्ति?

II. **<u>एकवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)</u>** **2X1=2**

(i) लोहित नद्याः उद्गमस्थलं किम् ?

(ii) मनोहरे सुरम्ये तवाङ्ग इति स्थले कः राजते?

(iii) लोहित जनपदे किमस्ति?

III. **<u>यथानिर्देशानुसारं लिखत (केवलं प्रश्नद्वयम्)</u>** **2x1=2**

(i) 'स्थली' अस्य विशेषण पदं किम् ?

(ii) 'आसीत्' इति क्रियायाः कर्तृपदं किम् ?

(iii) 'मनोहरे स्थले' इति अनयोः विशेषण पदं किम् ?

**15.** **<u>अधोलिखित रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत |</u>** **5x1=5**

(i) **<u>विधात्रा</u>** एव अहं पक्षिराजः कृतः |

(ii) सूर्योदये **<u>तमः</u>** नश्यति |

(iii) **<u>आचार्यः</u>** पुत्रं सावधानम् अकरोत् |

(iv) अयं पुरुषः **<u>पापं</u>** चरति |

(v) मधुरभाषिणी **<u>वाणी</u>** पुरुषं प्रहलादयति |

**. 16** **<u>मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत -</u>** **4x1/2=2**

I. " शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा |

ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ||"

**अन्वयः -** शुश्रूषा ...........(i)............. च एव , .............(ii)............ तथा धारणम् ऊह, ..............(iii)............. अर्थविज्ञानं तत्वज्ञानं च ............(iv)............ भवन्ति

**( उपोह , धीगुणाः, श्रवणम्, ग्रहणम् )**

**(अथवा )**

II **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित - श्लोकस्य भावार्थं पूरयत -**

" विद्वान्सः एव लोकेऽस्मिन् चक्षुषमन्तः प्रकीर्तिताः |

अन्येषां वदने ये तु ते चक्षुनामनी मते ||"

**भावार्थः-** विद्या एव नरस्य ........(i)........अस्ति, जनाः अनया एव संसारे सर्वविधं व्यवहारं कर्तुं समर्थाः भवन्ति | अतः अस्मिन् संसारे केवलम् ........(ii)........ ज्ञानिनः विचारशीलाः एव .........(iii)...... कथिताः | अन्येषां विद्यारहितानाम् .........(iv)....... तु ये चक्षुषी भवतः ते तु नाममात्रम् एव

**( आनने, विद्वांसः, नेत्रम्, नेत्रवन्तः )**

**17.** **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चित्वा लिखत** **4x1=4**

(i) यः इच्छत्यात्मनः **श्रेयः** |

(क)अघर्यम् (ख) गृहम् (ग) कल्याणम्_ (घ) अमूल्यम्

(ii) काकस्य **गात्रं** यदि काञ्चनस्य ।

(क) गोत्रम् (ख) कुटुम्बम् (ग) शरीरम् (घ) पात्रम्

(iii) अहर्निशं **महानसं** प्रविश्य यत् पश्यति तद् भक्षयति स्म |

(क) महानाशम् (ख) भोजनशालाम् (ग) महान्तम् (घ) महति

(iv) अस्माकं क्षेत्रे सुवर्णपूरितः **कलशः** विद्यते |

(क)कलेशः (ख) काकः (ग) सर्वत्र (घ) घटः

**18.** **कथां रिक्तस्थानानि पूरयित्वा पुनः लिखत-** **8x1/2=4**

अथ व्रजन्तौ तौ ..........(i)........ मार्गे क्रीडतः .........(ii)....... बालकान् प्रेक्ष्य अवदताम् - भो बालकाः! कथमत्र .........(iii)........ विषमे मार्गे क्रीडथ ? यदि कश्चित् गर्हे पतेत् तर्हि स ......(iv)........ भूत्वा चिरं ..........(v)........ अनुभवेत् | .........(vi)........ तेषु कश्चित् उद्दण्डः

बालकः उवाच- अयि भो ! यदि एवम् अस्ति तर्हि कथं भवन्तौ सुपथं ........(vii)....... अनेन कुपथेन गन्तुं प्रवृत्तौ ? अपि इदं ........(viii).........?

**मञ्जूषा-**

**( गर्तसङ्कुले, विक्लाङ्गो, नतोन्नते, कान्धित, क्लेशम्, तत्श्रुत्वा, श्रेयष्करम्, परित्यज्य )**

**END OF THE QUESTION PAPER**